# ॥ वाल्मीकि रामायण ॥

## ७ उत्तरकाण्ड

### अध्याय ९०

कस्य चित्त्वथ कालस्य युधाजित्केकयो नृपः ।
स्वगुरुं प्रेषयामास राघवाय महात्मने ॥ १ ॥

गार्ग्यमङ्गिरसः पुत्रं ब्रह्मर्षिममितप्रभम् ।
दश चाश्वसहस्राणि प्रीतिदानमनुत्तमम् ॥ २ ॥

कम्बलानि च रत्नानि चित्रवस्त्रमथोत्तमम् ।
रामाय प्रददौ राजा बहून्याभरणानि च ॥ ३ ॥

श्रुत्वा तु राघवो गार्ग्यं महर्षिं समुपागतम् ।
मातुलस्याश्वपतिनः प्रियं दूतमुपागतम् ॥ ४ ॥

प्रत्युद्गम्य च काकुत्स्थः क्रोशमात्रं सहानुगः ।
गार्ग्यं सम्पूजयामास धनं तत्प्रतिगृह्य च ॥ ५ ॥

पृष्ट्वा च प्रीतिदं सर्वं कुशलं मातुलस्य च ।
उपविष्टं महाभागं रामः प्रष्टुं प्रचक्रमे ॥ ६ ॥

किमाह मतुलो वाक्यं यदर्थं भगवानिह ।
प्राप्तो वाक्यविदां श्रेष्ठ साक्षादिव बृहस्पतिः ॥ ७ ॥

रामस्य भाषितं श्रुत्वा ब्रह्मर्षिः कार्यविस्तरम् ।
वक्तुमद्भुतसङ्काशं राघवायोपचक्रमे ॥ ८ ॥

मातुलस्ते महाबाहो वाक्यमाह नरर्षभ ।
युधाजित्प्रीतिसंयुक्तं श्रूयतां यदि रोचते ॥ ९ ॥

अयं गन्धर्वविषयः फलमूलोपशोभितः ।
सिन्धोरुभयतः पार्श्वे देशः परमशोभनः ॥ १० ॥

तं च रक्षन्ति गन्धर्वाः सायुधा युद्धकोविदाः ।
शैलूषस्य सुता वीरास्तिस्रः कोट्यो महाबलाः ॥ ११ ॥

तान्विनिर्जित्य काकुत्स्थ गन्धर्वविषयं शुभम् ।
निवेशय महाबाहो द्वे पुरे सुसमाहितः ॥ १२ ॥

अन्यस्य न गतिस्तत्र देशश्चायं सुशोभनः ।
रोचतां ते महाबाहो नाहं त्वामनृतं वदे ॥ १३ ॥

तच्छ्रुत्वा राघवः प्रीतो मरर्षिर्मातुलस्य च ।
उवाच बाढमित्येवं भरतं चान्ववैक्षत ॥ १४ ॥

सोऽब्रवीद्राघवः प्रीतः प्राञ्जलिप्रग्रहो द्विजम् ।
इमौ कुमारौ तं देशं ब्रह्मर्षे विजयिष्यतः ॥ १५ ॥

भरतस्यात्मजौ वीरौ तक्षः पुष्कल एव च ।
मातुलेन सुगुप्तौ तौ धर्मेण च समाहितौ ॥ १६ ॥

भरतं चाग्रतः कृत्वा कुमारौ सबलानुगौ ।
निहत्य गन्धर्वसुतान्द्वे पुरे विभजिष्यतः ॥ १७ ॥

निवेश्य ते पुरवरे आत्माजौ संनिवेश्य च ।
आगमिष्यति मे भूयः सकाशमतिधार्मिकः ॥ १८ ॥

ब्रह्मर्षिमेवमुक्त्वा तु भरतं सबलानुगम् ।
आज्ञापयामास तदा कुमारौ चाभ्यषेचयत् ॥ १९ ॥

नक्षत्रेण च सौम्येन पुरस्कृत्याङ्गिरः सुतम् ।
भरतः सह सैन्येन कुमाराभ्यां च निर्ययौ ॥ २० ॥

सा सेना शक्रयुक्तेव नरगान्निर्ययावथ ।
राघवानुगता दूरं दुराधर्षा सुरासुरैः ॥ २१ ॥

मांसाशीनि च सत्त्वानि रक्षांसि सुमहान्ति च ।
अनुजग्मुश्च भरतं रुधिरस्य पिपासया ॥ २२ ॥

भूतग्रामाश्च बहवो मांसभक्षाः सुदारुणाः ।
गन्धर्वपुत्रमांसानि भोक्तुकामाः सहस्रशः ॥ २३ ॥

सिंहव्याघ्रसृगालानां खेचराणां च पक्षिणाम् ।
बहूनि वै सहस्राणि सेनाया ययुरग्रतः ॥ २४ ॥

अध्यर्धमासमुषिता पथि सेना निरामया ।
हृष्टपुष्टजनाकीर्णा केकयं समुपागमत् ॥ २५ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com